योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ५५

अज्ञातलेखकः

श्रीराम उवाच ।

आत्मज्ञानदिनैकार्क मत्संशयतृणानल ।

अज्ञानदाहशीतांशो सत्तासामान्यमीश किम् ।। १

श्रीवसिष्ठ उवाच ।

यदा संक्षीयते चित्तमभावात्यन्तभावनात् ।

चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा ।। २

नूनं चेत्यांशरहिता चिद्यदात्मनि लीयते ।

असद्रूपवदत्यच्छा सत्तासामान्यता तदा ।। ३

यदा सर्वमिदं किंचित्सबाह्याभ्यन्तरात्मकम् ।

अपलप्य वसेच्चेतः सत्तासामान्यता तदा ।। ४

यदा सर्वाणि दृश्यानि सत्तासामान्यवेदनम् ।

स्वरूपेण स्वरूपाभं सत्तासामान्यता तदा ।। ५५

कूर्मोऽङ्गानीव दृश्यानि लीयन्ते स्वात्मनात्मनि ।

अभावितान्येव यदा सत्तासामान्यता तदा ।। ५

दृष्टिरेषा हि परमा सदेहादेहयोः सदा ।

मुक्तयोः संभवत्येव तुर्यातीतपदोपमा ।। ७

व्युत्थितस्य भवत्येषा समाधिस्थस्य चानघ ।

ज्ञस्य केवलमज्ञस्य न भवत्येव बोधजा ।। ८

अस्यां दृशि स्थिताः सर्वे जीवन्मुक्ता महाशयाः ।

सिद्धा रसा इव भुवि व्योमवीथ्यामिवानिलाः ।। ९

अस्मत्प्रभृतयः सर्वे नारदाद्याश्च राघव ।

ब्रह्मविष्ण्वीश्वराद्याश्च दृष्टावस्यां व्यवस्थिताः ।। १०

एतामालम्ब्य पदवीं समस्तभयनाशिनीम् ।

उद्दालकोऽसाववसद्यावदिच्छं जगद्गृहे ।। ११

अथ कालेन बहुना बुद्धिस्तस्य बभूव ह ।

विदेहमुक्तस्तिष्ठामि देहं त्यक्त्वेति निश्चला ।। १२

एवं चिन्तितवानद्रेर्गुहायां पल्लवासने ।

बद्धपद्मासनस्तस्थावर्धोन्मीलितलोचनः ।। १३

संयम्य गुदसंरोधाद्द्वाराणि नव चेतसः ।

मात्रास्पर्शान्विचिन्वानो भावितस्वाङ्गचिद्धनः ।। १४

संरुद्धप्राणपवनः समसंस्थानकन्धरः ।

तालुमूलतलालग्नजिह्वामूलो लसन्मुखः ।। १५

न बहिर्नान्तरे नाधो नोर्ध्वे नार्थे न शून्यके ।

संयोजितमनोदृष्टिर्दन्तैर्दन्तानसंस्पृशन् ।। १६

प्राणप्रवाहसंरोधसमः स्वच्छाननच्छविः ।

अङ्ग चित्संविदुत्तानरोमकण्टकिताङ्गभूः ।। १७

अङ्गचित्संविदाभ्यासाच्चित्सामान्यमुपाददे ।

तदभ्यासादवापान्तरानन्दस्पन्दमुत्तमम् ।। १८

तदास्वादनतो लीनचित्सामान्यदशाक्रमम् ।

विश्वंभरमनन्तात्म सत्तासामान्यमाययौ ।। १९

तस्थौ समसमाभोगः परां विश्रान्तिमागतः ।

अनानन्दसमानन्दमुग्धमुग्धमुखद्युतिः ।। २०

संशान्तानन्दपुलकः पदं प्राप्यामलं गतः ।

चिरकालपरिक्षीणमननादिभवभ्रमः ।। २१

बभूव स महासत्त्वो लिपिकर्मार्पितोपमः ।

समः कलावपूर्णेन शरदच्छाम्बरेन्दुना ।। २२

उपशशाम शनैर्दिवसैरसौ
कतिपयैः स्वपदे विमलात्मनि ।
तरुरसः शरदन्त इवामले
रविकरौजसि जन्मदशातिगः ।। २३
गतसकलविकल्पो निर्विकारोऽभिरामः
सकलमलविलासोपाधिनिर्मुक्तमूर्तिः ।
विगलितसुखमाद्यं तत्सुखं प्राप यस्मिं-
स्तृणमिव जलराशावूह्यते शक्रलक्ष्मीः ।।२४
अपरिमितनभोन्तर्व्यापिदिग्व्यापि पूर्णं
भुवनभरणशीलं भूरिभव्योपसेव्यम् ।
कथनगुणमतीतं सत्यमानन्दमाद्यं
परमसुखमनन्तं ब्राह्मणोऽसौ बभूव ।। २५
गतवति पदमाद्यं चेतसि स्वच्छभावं
द्विजतनुरथ मासैः सोपविष्टैव षड्भिः ।
रविकरपरितप्ता वातभांकाररम्या
तनुतरुभुजतन्त्री शैलवीणा बभूव ।। २६
अथ बहुतरकालेनैतदद्रेर्भुवं ता-
मुपययुरगकन्याऽसंयुता मातरः खात् ।
अभिमतफलसिद्धौ संयुता एव सर्वा
अनलमिव शिखानां पङ्क्तयः पिङ्गकेश्यः २७
दिनकरकरशुष्कं विप्रकंकालकं त
ज्झटिति मुकुटकोटौ खड्गखट्वाङ्गमध्ये ।
सकलविबुधवन्द्या खिंखिनी देवदेवी
निशि नवतरवृत्ताकान्तकान्तिं चकार।।२८
इत्युद्दालकदेहकं सुविलसन्मायूरबर्हव्रज-
व्यालोलाब्दलवे नवैर्विवलिते मन्दारमालागणैः ।

शेते खिंखिनिका महाभगवती लीलाललामे लता-
जाले भृङ्ग इवान्तपुष्पपटले पश्चादुपागच्छति ।। २९
एषोद्दालकचित्तवृत्तिकलनावल्ली विवेकस्फुर-
त्स्वानन्दप्रविकासभासिकुसुमा हृत्कानने विस्तृता ।।
रूढा यस्य कदाचिदेव विहरन्नप्येव सच्छायया
नासावेति वियोगमेति सफलेनोच्चैस्तरां संगमम् ३०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते भो० उपशमप्रकरणे उद्दालकनिर्वाणं नाम पञ्चपञ्चाशः सर्गः ।। ५५ ।।